# Dinakrandakhya Shiva Kshamapanam

# દીનાક્રન્દાખ્ય શિવક્ષમાપણમ્

## Document Information

Text title : Dinakrandakhya Shiva Kshamapanam

File name : dInAkrandAkhyashivakShamApaNam.itx

Category : shiva

Location : doc_shiva

Author : Ravana

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : September 29, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 29, 2019

*sanskritdocuments.org*

# દીનાક્રન્દાખ્ય શિવક્ષમાપણમ્

ૐ ગૌરીશ્વરાય ભુવનત્રયકારણાય
    ભક્તપ્રિયાય ભવભીતિભિદે ભવાય ।
શર્વાય દુઃખશમનાય વૃષધ્વજાય
    રુદ્રાય કાલદહનાય નમઃ શિવાય ॥ ૧॥

સર્વેશ્વરત્વે સતિ ભસ્મશાયિને
    હ્યુમાપતિત્વે સતિ ચોર્ધ્વરેતસે ।
વિત્તેશભૃત્યે સતિ ચર્મવાસસે
    નિવૃત્તરાગાય નમસ્તપસ્વિને ॥ ૨॥

ઓઙ્કારેણ વિહીનસ્ય નિત્યમુદ્વિગ્નચેતસઃ ।
તાપત્રયાગ્નિતપ્તસ્ય ત્રાણં કુરુ મહેશ્વર ॥ ૩॥

કાયપોષણસક્તસ્ય રોગશોકાકુલસ્ય ચ ।
ભવાર્ણવનિમગ્નસ્ય ત્રાણં કુરુ મહેશ્વર ॥ ૪॥

મદનોરગદષ્ટસ્ય ક્રોધાગ્નિજ્વલિતસ્ય ચ ।
લોભમોહાદિસક્તસ્ય ત્રાણં કુરુ મહેશ્વર ॥ ૫॥

તૃષ્ણાશ‍ૃઙ્ખલયા નાથ બદ્ધસ્ય ભવપઞ્જરે ।
કૃપાર્દ્રદીનચિત્તસ્ય ત્રાણં કુરુ મહેશ્વર ॥ ૬॥

ભટૈર્નાનાવિધૈર્ઘોરૈર્યમસ્યાજ્ઞાવિધાયકૈઃ ।
તાં દિશં નીયમાનસ્ય ત્રાણં કુરુ મહેશ્વર ॥ ૭॥

દુષ્ટસ્ય નષ્ટચિત્તસ્ય શ્રેષ્ઠમાર્ગોજ્ઝિતસ્ય ચ ।
અનાથસ્ય જગન્નાથ ત્રાણં કુરુ મહેશ્વર ॥ ૮॥

સંસારપાશદૃઢબન્ધનપીડિતસ્ય
    મોહાન્ધકારવિષમેષુ નિપાતિતસ્ય ।
કામાર્દિતસ્ય ભયરાગખલીકૃતસ્ય

દીનસ્ય મે કુરુ દયાં પરલોકનાથ ॥ ૯॥

દીનોઽસ્મિ મન્દધિષણોઽસ્મિ નિરાશ્રયોઽસ્મિ
દાસોઽસ્મિ સાધુજનતાપરિવર્જિતોઽસ્મિ ।
દુષ્ટોઽસ્મિ દુર્ભગતમોઽસ્મિ ગતત્રપોઽસ્મિ
ધર્મોજ્ઝિતોઽસ્મિ વિકલોઽસ્મિ કલઙ્કિતોઽસ્મિ ॥ ૧૦॥

ભીતોઽસ્મિ ભઙ્ગુરતમોઽસ્મિ ભયાનકોઽસ્મિ
શઙ્કાશતવ્યતિકરાકુલચેતનોઽસ્મિ ।
રાગાદિદોષનિકરૈર્મુખરીકૃતોઽસ્મિ
સત્યાદિશૌચનિયમૈઃ પરિવર્જિતોઽસ્મિ ॥ ૧૧॥

જન્માટવીભ્રમણમારુતખેદિતોઽસ્મિ
નિત્યામયોસ્મ્યઽશરણોસ્મ્યઽસમઞ્જસોઽસ્મિ ।
આશાનિરઙ્કુશપિશાચિકયાર્દિતોઽસ્મિ
હાસ્યોઽસ્મિ હા પશુપતે શરણાગતોઽસ્મિ ॥ ૧૨॥

હા હતોઽસ્મિ વિનષ્ટોઽસ્મિ દષ્ટોઽસ્મિ ચપલેન્દ્રિયૈઃ ।
ભવાર્ણવનિમગ્નોઽસ્મિ કિં ત્રાતું મમ નાર્હસિ ॥ ૧૩॥

યદિ નાસ્મિ મહાપાપી યદિ નાસ્મિ ભયાતુરઃ ।
યદિ નેન્દ્રિયસંસક્તસ્તત્કોર્થઃ શરણે મમ ॥ ૧૪॥

આર્તો મત્સદૃશો નાન્યસ્ત્વત્તો નાન્યઃ કૃપાપરઃ ।
તુલ્ય એવાવયોર્યોગઃ કથં નાથ ન પાહિ મામ્ ॥ ૧૫॥

આકર્ણયાઽશુ કૃપણસ્ય વચાંસિ સમ્યક્
લબ્ધોઽસિ નાથ બહુભિર્નનુ જન્મવૃન્દૈઃ ।
અદ્ય પ્રભો યદિ દયાં કુરુષે ન મે ત્વં
ત્વત્તઃ પરં કથય કં શરણં વ્રજામિ ॥ ૧૬॥

દ્વેષ્યોહં સર્વજન્તૂનાં બન્ધૂનાં ચ વિશેષતઃ ।
સુહૃદ્વર્ગસ્ય સર્વસ્ય કિમન્યત્કથયામિ તે ॥ ૧૭॥

માતાપિતૃવિહીનસ્ય દુઃખશોકાતુરસ્ય ચ ।
આશાપાશનિબદ્ધસ્ય રાગદ્વેષયુતસ્ય ચ ॥ ૧૮॥

દેવદેવ જગન્નાથ શરણાગતવત્સલ ।
નાન્યસ્ત્રાતાસ્તિ મે કશ્ચિત્ત્વદૃતે પરમેશ્વર ॥ ૧૯॥

ભીતોऽસ્મિ કાલવશગોऽસ્મિ નિરાશ્રયોऽસ્મિ
    ખિન્નોऽસ્મિ દુઃખજલધૌ પતિતોऽસ્મિ શમ્ભો ।
આર્ત્તોऽસ્મિ મોહપટલેન સમાવૃતોऽસ્મિ ત્વાં
    ચન્દ્રચૂડ શરણં સમુપાગતોऽસ્મિ ॥ ૨૦॥

આશિખાન્તં નિમગ્નોऽસ્મિ દુસ્તરે ભવકર્દમે ।
પ્રસીદ કૃપયા શમ્ભો પાદાગ્રેણોદ્ધરસ્વ મામ્ ॥ ૨૧॥

શ્રુત્વા મે ભવભીતસ્ય ભગવન્કરુણા ગિરઃ ।
તથા કુરુ યથા ભૂયો ન બાધન્તે ભવાપદઃ ॥ ૨૨॥

સમયશતવિલુપ્તં ભક્તિહીનં કુચૈલં
    મલિનવસનગાત્રં નિર્દયં પાપશીલમ્ ।
રવિજભ્રુકુટિભીતં રોગિણં પ્રાપ્તદુઃખં
    ખલજનપરિભૂતં રક્ષ માં સર્વશક્તે ॥ ૨૩॥

આપન્નોऽસ્મિ શરણ્યોऽસિ સર્વાવસ્થાસુ સર્વદા ।
ભગવંસ્ત્વાં પ્રપન્નોऽસ્મિ રક્ષ માં શરણાગતમ્ ॥ ૨૪॥

જાતસ્ય જાયમાનસ્ય ગર્ભસ્થસ્યાપિ દેહિનઃ ।
માભૂત્તત્ર કુલે જન્મ યત્ર શમ્ભુર્ન દૈવતમ્ ॥ ૨૫॥

શઙ્કરસ્ય ચ યે ભક્તાઃ શાન્તાસ્તદ્ગતમાનસાઃ ।
તેષાં દાસસ્ય દાસોહં ભૂયાં જન્મનિ જન્મનિ ॥ ૨૬॥

નમસ્કારાદિસંયુક્તં શિવેત્યક્ષરદ્વયમ્ ।
જિહ્વાગ્રે વર્તતે યસ્ય સફલં તસ્ય જીવિતમ્ ॥ ૨૭॥

યત્કૃતં યત્કરિષ્યામિ તત્સર્વં ન મયા કૃતમ્ ।
ત્વયા કૃતં તુ ફલભુક્ત્વમેવ પરમેશ્વર ॥ ૨૮॥

યદક્ષરપદભ્રષ્ટં માત્રાહીનં ચ યદ્ગતમ્ ।
મયા દાસેન વિજ્ઞપ્તં ક્ષમ્યતાં પરમેશ્વર ॥ ૨૯॥

ઇતિ શ્રીરાવણકૃતા દીનાક્રન્દનસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Dinakrandakhya Shiva Kshamapanam*

pdf was typeset on September 29, 2019

Please send corrections to *sanskrit@cheerful.com*